.. Bhrigupanchakastotra ..

॥ श्री भृगुपञ्चकस्तोत्रम् ॥

Document Information

Text title : bhRigupanchakastotram

File name : bhRigupanchakastotram.itx

Category : panchaka

Location : doc_deities_misc

Author : Samartha Shree

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Srinivas Kommireddy srinivas.kommireddy at googlemail.com

Proofread by : Srinivas Kommireddy, PSA Easwaran

Source : Sanskrit Jagat

Latest update : December 11, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

॥ भृगुपञ्चकस्तोत्रम् ॥

द्विजेन्द्रवंशतारकं समस्तदुःखहारकं
दरिद्रताविदारकं स्वधर्मसेतुधारकम् ।
सदैव देवनन्दितं समस्त शास्त्रपण्डितं
भजामि भस्मभूषितं स्वभर्गभासितं भृगुम् ॥ १॥

विरागरागनिर्झरं नमामि वै विदाम्वरं
परम्परारविन्दरेणुषद्वदं सिताम्बारम् ।
सदैव साधनापरं समाधिनिष्ठभूसुरं
भजामि भस्मभूषितं स्वभर्गभासितं भृगुम् ॥ २॥

सनातनं च शाश्वतं समष्टिसौख्यसर्जकं
समुन्नतं सुमानसं शिवादिसङ्गसाधकम् ।
समर्धकं समर्पितं सदैव शान्तिशोधकं
नमामि भस्मभूषितं स्वभर्गभासितं भृगुम् ॥ ३॥

पठामि भार्गवोत्तमं लिखामि तं भृगुं विभु
भजामि तं महागुरुं स्पृशामि तं महाप्रभुम् ।
स्मरामि तं महामुनिं वदामि तं स्वयम्भुवं
नमामि भस्मभूषितं स्वभर्गभासितं भृगुम् ॥ ४॥

अबोधतां विनाशितुं दरिद्रतां विदारितुं
प्रबोधतां प्रवाहितु सुमेधतां सुसाधितुम् ।
विकासवीथि भासितुं भजामि वै भृगुं शिवं
नमामि भस्मभूषितं स्वभर्गभासितं भृगुम् ॥ ५॥

॥ इति श्री भृगुपञ्चकस्तोत्रम् ॥

–कवि समर्थ श्री

Sourced from Sanskrit Jagat

Encoded and proofread by Srinivas Kommireddy
srinivas.kommireddy at googlemail.com
Proofread by PSA Easwaran

was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*